शास्त्री - प्रखण्ड साहित्य

## रघुवंश महाकाव्यम् - त्रयोदशः सर्गः

प्र० (1) - भ्रूभेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार ।
तस्याविलाम्भः परिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोऽयम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतांप्रति कथयति -
प्रिये ! योऽगस्त्यमुनिः इन्द्रस्य ब्रह्महत्याऽवसरे देवैरिन्द्रासनेऽभिषिक्तं शचीसमागमाय सप्तर्षिभिर्वाह्यमानां शिविकामारुह्य त्वरयन्तं चन्द्रवंशीयं प्रतापिनं राजानं नहुषं क्रोधात् भ्रूभंगमात्रेण महेन्द्रपदात् प्राच्यावितवान् । तस्यैवागस्त्यमुनेः सम्मुखवर्ती पृथिव्यां वर्तमानोऽयमाश्रमो दृश्यते । शरदि यस्योदयेन वर्षाकालकलुषितं जलं निर्मलं जायते । अयं हि सप्तर्षिषु गणितो दिवि अपितिष्ठति, देवकार्यार्थं दक्षिणां दिशमाशिश्रयदिति पौराणिकी कथाऽत्रानुसन्धेयेति भावः ।

व्याख्या - प्रिये ! यः = अगस्त्यमुनिः । भ्रूभेदमात्रेण = भ्रूभङ्गेनैव । नहुषम् = सोमवंशोद्भवं राजानं नहुषम् । मघोनः = इन्द्रस्य । पदात् = स्थानात्, इन्द्रत्वात् । प्रभ्रंशयाञ्चकार = पातयामास । आविलम्भः परिशुद्धिहेतोः = कलुषजलप्रसादकारणस्य । तस्य = पूर्वोक्तस्य । मुनेः = महर्षेः, अगस्त्यस्य । अयम् = एषः । भौमः = पार्थिवः । स्थानपरिग्रहः = आश्रमो दृश्यते ।

Renu Devi
15/10/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

उपशास्त्री - I खण्ड साहित्य - तृतीय पत्रम्
किरातार्जुनीयम् - प्रथमः सर्गः

प्र० (१) भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अन्वयः - भवादृशेषु, प्रमदाजनोदितम्, अनुशासनम् अधिक्षेप, इव भवति, तथापि निरस्तनारीसमयाः, दुराधयः, मां, वक्तुं, व्यवसाययन्ति ॥

पदार्थ - भवादृशेषु = आप जैसे (पण्डित) व्यक्ति के विषय में। प्रमदाजनोदितं = स्त्रीजनों द्वारा कहा हुआ। अनुशासनं = आदेशवाक्य। अधिक्षेप इव = आक्षेप (तिरस्कार) जैसा, भवति = होता है। तथापि = तो भी निरस्तनारीसमयाः = छुड़ा दिया है स्त्रियोचित (शालीनता रूप) (समय) आचरण जिन्होंने (ऐसी) दुराधयः = बुरी मनोव्यथाएँ। मां = मुझको। वक्तुं = कहने के लिए। व्यवसाययन्ति = प्रेरित कर रही है।

Renudevi
15/10/20
राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया।

उपशास्त्री - द्वितीय खण्ड साहित्य - तृतीय - पत्रम
किरातार्जुनीयम् - प्रथमः सर्गः

प्र०(1) नेता मध्यम पाण्डवो भगवतो नारायणस्यांशज -
स्तस्योत्कर्षकृते त्ववर्ण्यततरां दिव्यः किरातः पुनः ।
शृङ्गारादिरसोऽङ्गमत्र विजयी वीरः प्रधानो रसः
शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितः किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति उक्ति-समाप्तं करोति -

भावार्थः - विधातृनिर्मितनियमवशात् सायं सागररूपायां विपदि मग्नं विगतप्रभत्वात् प्रकाशहीनं शिथिलकिरणं प्रातः तिमिरततिमुदस्योद्यन्तं दिनकरं यथा दिवसलक्ष्मीः पुनरभ्युपैति तथैव दुर्दैववशात् कालप्रभावाच्च विपत्समुद्रे मज्जन्तं शिथिलविभवं च शत्रुमुदस्य पुनरात्मनः साम्राज्य प्राप्तये समुद्योगं कुर्वन्तं भवन्तं राजलक्ष्मीः पुनरभ्युपैतु ।

Renu Devi
15/10/20
राधा उमाकान्त सं महावि० सुरसेना
पूर्णिया ।

शास्त्री-I खण्ड साहित्य

अभिज्ञानशाकुन्तलम्

प्र० (1)- गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥

उत्तरम्-प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञान शाकुन्तलम् नाट्यशास्त्रस्य प्रथमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दुष्यन्तः नत्वहमितो यामि, किन्तु कर्तव्यबुद्धिर्मां नयतीत्याह – शरीरं ध्वजदण्ड इव मन्दं-मन्दं पुरो याति, चित्तं तु अस्थिरं सत् ध्वजवस्त्रमिव पश्चाद् व्रजति। मनोयोगेन शकुन्तलानुगाम्यहं केवलं कर्तव्यबुद्ध्यैव तां परित्यज्य देहमात्रेणान्यत्र गच्छामि।

व्याख्या:- वायोः प्रतिकूलं प्रति धातम् = वायुप्रतिकूलम्, नीयमानस्य उह्यमानस्य केनापि चाल्यमानस्य केतोः= ध्वजदण्डस्य चीनांशुकं = चीनदेशोद्भवस्त्रकृत पताका इव मम शरीरं = देहः, पुरः = अग्रे, संमुखम्, (सैन्यप्रति) गच्छति = याति, असंस्तुतं = अपरिचितम् चेतः = चित्तं पश्चात् शकुन्तलाभिमुखं धावति = जवेन प्रतिकूलं गच्छति। अकाण्डविजृम्भितेन प्रतिवातेनेव अतर्कितोपनतेन तदभिलाषेण पुनः पुनः प्रेर्यमाणं ध्वजदुकूलमिव मदीयं चेतः पश्चाद् व्रजति, शरीरं च ध्वजवत् पुरो मन्दं मन्दं गच्छतीति भावः। एतेन स्वचेतसश्चाञ्चल्यं, वपुषश्च हृदयशून्यत्वात् काष्ठतुल्यत्वं ध्वनितम्। अत्रातिशयोक्ति वृत्त्यनुप्रास-उपमा-उत्प्रेक्षा-अलङ्काराः छन्दश्चार्यास्ति।

Renu Devi
15/10/20
राधा उमाकान्त सं० महाविद्यालय सुखसेना, पूर्णिया ।